भवति। वैकुंठस्तु भगवान् अंशादिचतुर्भेदान् भक्ता-
नामनुग्रहार्थं करोति। अंशः, कलाः, आवेशा, इति
नृसिंहरामवासुदेवा एव त्रयः अंशावताराः। मत्स्य-
कूर्मवराहा एते त्रयःकलावताराः। वामनो बुद्धः
कल्की एते त्रय आवेशावताराः अन्ये नारदादयो
विभूतयः संति। एता ईश्वरस्य विभूतयः।

इति श्रीवल्लभाचार्यविरचिता भगवत्पीठिका संपूर्णा।

## अथ भा० सुबोधिनीप्रथमस्कंधकारिकाः।

श्रीकृष्णाय नमः।

वंदे श्रीकृष्णदेवं सुरनरकभिदं वेदवेदांतवेद्यं,
लोके भक्तिप्रसिद्ध्यै यदुकुलजलधौ
प्रादुरासीदपारः।
यस्याऽऽसीद्रूपमेव त्रिभुवनतरणे
भक्तिवच्च स्वतंत्रं,
शास्त्रं रूपं च लोके प्रकटयति मुदा,
यः स नो भूतिहेतुः ॥ १ ॥
कर्ता ज्ञः सकलस्य यो निगमभूः
सर्वस्वरूपोऽपि सन्।
सर्वस्याऽपि विधारणो विजयते
निर्दोष सर्वेष्टदः ॥

यो लीलाभिरनेकधा वितनुते
रूपं निजं केवलः ।
सोऽयं वाचि ममास्तु पूर्णगुणभूः
कृष्णावतारः पतिः ॥ २ ॥
श्रीमद्वल्लभविद्वदीशविलसद्वंशाब्धिपूर्णेंदवे,
श्रीगोपीपतिवंदिने सुमनसि ब्रह्मामृतस्यंदिने ।
श्रीमल्लक्ष्मणभट्टसूरिरिति यन्नामाखिलाभीष्टदं,
तस्मै तातमहाशयाय हरये कुर्मो नमः सिद्धये ॥ ३ ॥
श्रीमद्भागवतागमः सुरतरुर्लोके फलत्वं गतो,
भाषाभेदविभेदतस्त्रयमपि स्यान्नो विरुद्धं महत् ।
भक्त्यंशे फलता प्रमाणसुबले
वेदत्वमर्थे, पुनः,
स्कंधैर्द्वादशभिर्युतः, सुरतरुः
शाखा द्विवह्निद्वयम् ॥ ४ ॥
अर्थं तस्य विवेचितुं न हि विभु
वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय, मानुषतनुं
मां व्यासवच्छ्रीपतिः ।
दत्त्वाऽऽज्ञां च कृपावलोकनपटुर्यस्मादतोऽहं मुदा
गूढार्थं प्रकटीकरोमिबहुधा
व्यासस्य विष्णोः प्रियम् ॥ ५ ॥
लक्षणां नैव वक्ष्यामि न न्यूनादन्यपूरणम् ।
आर्थिकं तु प्रवक्ष्यामि परोक्षकथनादृते ॥ ६ ॥

अविरोधेन सप्तानार्थानामिह संगतिः।
उत्तरोत्तरदौर्बल्यं वाच्यं संकोचतः परम् ॥ ७ ॥

भाषात्रयविरोधश्च कल्पभेदात्समाहितः।
भाषात्रयविभेश्च लक्षणैर्ज्ञाप्यते पुनः ॥ ८ ॥

अर्थत्रयं तु वक्ष्यामि निबंधेऽस्ति चतुष्टयम्।
अत्र संतः स्वसंतोषैराज्ञां यच्छंतु सिद्धये ॥ ९ ॥

सुज्ञेषु हस्तयुगलं पुरतो विधाय,
विज्ञापयामि मुरवैरिपदाब्जनिष्ठः।
उच्छृंखलापि विवृतिर्मम चिंतनीया,
श्रीकृष्णपादयुगलेऽचिनिवेशितेति ॥१०॥

इति श्रीवल्लभाचार्यविरचितायां सुबोधिन्यां प्रथमस्कंधभा० व्या० कारिकाः समाप्ताः।

## अथ शिक्षाश्लोकाः।

श्रीकृष्णाय नमः।

यदा बहिर्मुखा यूयं भविष्यथ कथं चन।
तदा कालप्रवाहस्था देहचित्तादयोऽप्युत ॥ १ ॥

सर्वथा भक्षयिष्यंति युष्मानिति मतिर्मम।
न लौकिकः प्रभुः कृष्णो मनुते नैव लौकिकम् ॥ २ ॥